# yogashAntiGYAnapradaM gaNeshastotram

# યોગશાન્તિજ્ઞાનપ્રદં ગણેશસ્તોત્રમ્

## Document Information

Text title : yogashAntiGYAnapradaM gaNeshastotram

File name : yogashAntigaNesha.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) Amith K Nagaraj

Proofread by : Karthik Chandan.P, Amith K Nagaraj (amithkn at rediffmail.com)

Description-comments : mudgalapurANa

Latest update : January 2, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# યોગશાન્તિજ્ઞાનપ્રદં ગણેશસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

સનકાદ્યા ઊચુઃ ।

ધન્યોઽસિ નૃપશાર્દૂલ બુદ્ધિસ્તે પરમાદ્ભુતા ।
નિર્વેદં રાજભોગેભ્યઃ સમ્પ્રાપ્તઃ પૃથુલશ્રવાઃ ॥ ૧॥

યોગશન્તિમયં પૂર્ણં ગણેશં વિદ્ધિ ભૂમિપ ।
તં ભજસ્વ મહાભક્ત્યા તયા શાન્તિં ગમિષ્યસિ ॥ ૨॥

એકદા સ્મ વયં સર્વે સઙ્ગતાઃ શઙ્કરાલયમ્ ।
વટમૂલે સમાસીનં પશ્યામો ધ્યાનસંસ્થિતમ્ ॥ ૩॥

તમ્ પ્રણમ્ય સ્થિતાઃ સર્વે વયં વિનયસંસ્થિતાઃ ।
સ્તોત્રૈસ્તં બોધયન્તશ્ચ બુબોધ વૈ શિવસ્તતઃ ॥ ૪॥

ત્યક્ત્વા ધ્યાનં ગણેશાય નમો વદતમાદરાત્ ।
શ્રુત્વા ભ્રાન્તા વયં તસ્મૈ પૃચ્છામઃ સંશયાન્વિતાઃ ॥ ૫॥

કોઽસૌ ગણાધિપઃ સ્વામિન્નમસિ ત્વં કથં પ્રભો ।
શિવઃ સહજરૂપસ્ત્વં સ્વાધીનઃ સતતં મતઃ ॥ ૬॥

અસ્માકં વચનં શ્રુત્વા શિવો હર્પસમન્વિતઃ ।
જગાદ જ્ઞાનમાદ્યં યદ્ગાણપત્યં સ શાન્તિદમ્ ॥ ૭॥

શ્રીશિવ ઉવાચ ।
બ્રહ્મ યત્કથ્યતે વેદૈઃ કથં તત્ર પ્રવર્તતે ।
સ્વાધીનં સહજં વિપ્રાપરાધીનં ત્રિધાભવમ્ ॥ ૮॥

કર્મયોગાદિભેદેન વેદેષુ વેદવાદિભિઃ ।
નાનાવિધં વર્ણિતં યદ્ બ્રહ્મ તન્માયયાન્વિતમ્ ॥ ૯॥

કર્મણાં સકલાનાં સંયોગો બ્રહ્મણિ જાયતે ।

તેન કર્માત્મકં બ્રહ્મ તદજ્ઞાનાધિકં મતમ્ ॥ ૧૦॥

સમૂહાત્મકશબ્દશ્ચ ગણ ઇત્યભિધીયતે ।
બાહ્યાન્તરાધિભેદેનાસંયોગે સમૂહો મતઃ ॥ ૧૧॥

અન્નપ્રાણાદિકાઃ શબ્દા બ્રહ્મણો વાચકા મતાઃ ।
તે સર્વે ગણરૂપાશ્ચ તેષાં સ્વામી ગણેશ્વર ॥ ૧૨॥

સંયોગાઽયોગકાદ્યા યે નાના યોગા મતા બુધૈઃ ।
યોગાનાં યોગરૂપોઽયં ગણેશો નાત્ર સંશયઃ ॥ ૧૩॥

ગણો યોગાત્મકઃ પ્રોક્તસ્તસમાત્તસ્ય ગણા વયમ્ ।
યોગરૂપં વિશેષેણ નમામો ભક્તિસંયુતાઃ ॥ ૧૪॥

માયા વિદ્યાત્મિકા પ્રોક્તા ભ્રાન્તિદા બિમ્બભાવતઃ ।
તાં જયન્તિ જના ઈશા વિઘ્નરાજસ્ય સેવયા ॥ ૧૫॥

ભવન્તિ તે બ્રહ્મભૂતા યોગીન્દ્રા ગાણપાઃ સ્મૃતાઃ ।
અહં ગણેશરૂપો વૈ ભિન્નં માયામયં મતમ્ ॥ ૧૬॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં સા બુદ્ધિર્વિવિધાત્મિકા ।
તત્રૈશ્વર્યં ચ યત્પ્રોક્તં સિદ્ધિદઃ સા પરમાદ્ભુતા ॥ ૧૭॥

તત્ર યદ્ બિમ્બભાવેન ગણેશઃ પ્રતિતિષ્ઠતિ ।
માયાભ્યાં મોહિતોઽત્યન્તં સર્વત્રાસૌ વિરાજતે ॥ ૧૮॥

બિમ્બભાવં પરિત્યજય ગણેશસ્યૈવ સેવયા ।
પઞ્ચધા ચિત્તમુત્સૃજ્ય સ્વયં ચિન્તામણિર્ભવેત્ ॥ ૧૯॥

ગણેશોઽહં યદા વિપ્રાસ્તદા કુત્ર પ્રવર્તતે ।
સંયોગો મે તથા યોગઃ શાન્તિયોગં લભેત્તતઃ ॥ ૨૦॥

ન ભિન્નોઽહં કદા તસ્માદ્ગણેશાન્નાત્ર સંશયઃ ।
યોગીન્દ્રઃ શાન્તિયોગેન બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૨૧॥

એતદેવ મદીયં યદ્ગુહ્યં ધ્યાનં પ્રકીર્તિતમ્ ।
અતો ગણેશદાસોઽહં તં નમામિ સદા દ્વિજાઃ ॥ ૨૨॥

એવમુક્ત્વા મહાયોગી વીરરામ સ શઙ્કરઃ ।
ઉચ્છિન્નસંશયા જાતાઃ સનકાદ્યા વયં નૃપ ॥ ૨૩॥

વિચરામો મહીમેતામ્ સ્વર્ગેષુ વિવરેષુ ।
યોગમાર્ગેણ યોગીશા ગાણપત્યસ્વભાવતઃ ॥ ૨૪॥

ગણેશદર્શને જાતા લાલસા વયમાદરાત્ ।
તસ્મિન્કાલે ગણાધીશઃ કશ્યપસ્યાત્મજોઽભવત્ ॥ ૨૫॥

કાશીરાજો મહાભક્તો ગાણપત્યપરાયણઃ ।
તસ્ય ગૃહે ગતો દેવઃ સ્વકીયાચાર્યસાધનાત્ ॥ ૨૬॥

દર્શનાર્થં વયં તત્ર ગતાઃ કાશ્યાં મહામતે ।
દર્શયામો ગણેશં સ્મ બ્રહ્મચારિસ્વરૂપિણમ્ ॥ ૨૭॥

તમ્ પ્રણમ્ય વયં રાજન્ સ્થિતા ભક્ત્યા સમન્વિતાઃ ।
બાલરૂપધરં દેવં સ્તુમઃ સ્મ બાલયૂથગમ્ ॥ ૨૮॥

સનકાદ્યા ઊચુઃ ।
નમો વિનાયકાયૈવ કશ્યપપ્રિયસૂનવે ।
અદિતેર્જઠરોત્પન્ન બ્રહ્મચારિન્નમોઽસ્તુ તે ॥ ૨૯॥

ગણેશાય સદા માયાધારાય તદ્વિવર્જિત ।
ભક્ત્યધીનાય વૈ તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૩૦॥

તદ્ બ્રહ્મ શાશ્વતં દેવ બ્રહ્મણાં પતિરઞ્જસા ।
યોયાયોગાદિભેદેન ક્રીડસે નાત્ર સંશયઃ ॥ ૩૧॥

આદિમધ્યાન્તરૂપસ્ત્વં પ્રકૃતિઃ પુરુષસ્તથા ।
નાદાનન્દૌ ચ સૂક્ષ્મસ્ત્વં સ્થૂલરૂપો ભવાન્ પ્રભો ॥ ૩૨॥

સુરાસુરમયઃ સાક્ષાન્નરનાગસ્વરૂપધૃક્ ।
જલસ્થલાદિભેદેન શોભસે ત્વં ગજાનન ॥ ૩૩॥

સર્વેભ્યો વર્જિતસ્ત્વં વૈ માયાહીનઃ સ્વરૂપધૃક્ ।
માયામાયિકરૂપશ્ચ કો જાનાતિ ગતિં પરામ્ ॥ ૩૪॥

કથં સ્તુમો ગણાધીશં યોગાકારમયં સદા ।
દેવા ન શંભુમુખ્યાશ્ચ શક્તાઃ સ્તોતું કદાચન ॥ ૩૫॥

વયં ધન્યા વયં ધન્યા યેન પ્રત્યક્ષતાં ગતઃ ।
અસ્માકં યોગિનાં ઢુણ્ઢે કુલદેવસ્ત્વમઞ્જસા ॥ ૩૬॥

ઇત્યુક્ત્વા મૌનમાસ્થાય નનામ દણ્ડવચ્ચ તમ્ ।

ઉવાચ નો ગણાધીશો ભક્તિભાવનિયન્ત્રિતઃ ॥ ૩૭॥

વિનાયક ઉવાચ ।
ભવદ્ભિર્યત્કૃતં સ્તોત્રં મદીયં યોગશાન્તિદમ્ ।
ભવિષ્યતિ મહાભાગાઃ પઠતઃ શ‍ૃણ્વતઃ સદા ॥ ૩૮॥

યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રભાવતઃ ।
ભવન્તો ગાણપત્યાશ્ચ ભવિષ્યથ યથા શિવઃ ॥ ૩૯॥

એવમુક્ત્વા સ્વયં બાલશ્ચિક્રીડ પ્રાકૃતો યથા ।
બાલકૈઃ સહ યોગાત્મા કાશ્યપઃ પૂર્વવન્નૃપઃ ॥ ૪૦॥

વયં કાશીપતે રાજન્ દર્શનાર્થં ગતાસ્તતઃ ।
તેનાપિ માનિતાઃ સમ્યક્ ભુક્ત્વા ચ સ્વપદે પુનઃ ॥ ૪૧॥

એતત્તે કથિતં સર્વં યોગશાન્તિમયં મહત્ ।
જ્ઞાનં પૂર્ણં ગણેશાખ્યં તં ભજસ્વ ગણાધિપમ્ ॥ ૪૨॥

ઇતિ શ્રીમુદ્ગલપુરાણાન્તર્ગતં ગણેશસ્તોત્રં સમાપ્તમ્ ।

Encoded and proofread by
Karthik Chandan.P (kardan5380@yahoo.com)
Amith K Nagaraj (amithkn@rediffmail.com)

*yogashAntiGYAnapradaM gaNeshastotram*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*